# Shri Vishnu Ashtakam

# શ્રીવિષ્ણ્વષ્ટકમ્

## Document Information

Text title : Vishnvashtakam

File name : viShNvaShTakam4.itx

Category : vishhnu, aShTaka

Location : doc_vishhnu

Transliterated by : P. R. Ramamurthy

Proofread by : P. R. Ramamurthy

Latest update : September 18, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 18, 2022

*sanskritdocuments.org*

Shri Vishnu Ashtakam

# શ્રીવિષ્ણ્વષ્ટકમ્

શતાનીકઃ -
બ્રહ્મન્નપારે સંસારે રાગાદિવ્યાપ્તમાનસઃ ।
શબ્દાદિલુબ્ધપુરુષઃ કિં કુર્વન્નાવસીદતિ ॥ ૧॥

શ્રી શૌનકઃ -
સ્વે મહિમ્નિ સ્થિતં દેવમપ્રમેયમજં વિભુમ્ ।
શોકમોહવિનિર્મુક્તં વિષ્ણું ધ્યાયન્ન સીદતિ ॥ ૨॥

પ્રમાણમતિગં બ્રહ્મ વેદાન્તેષુ પ્રકાશિતમ્ ।
આદ્યં પુરુષમીશાનં વિષ્ણું ધ્યાયન્ન સીદતિ ॥ ૩॥

અમૃતં સાધનં સાધ્યં યં પશ્યન્તિ મનીષિણઃ ।
જ્ઞેયાખ્યં પરમાત્માનં વિષ્ણું ધ્યાયન્ન સીદતિ ॥ ૪॥

અશનાદ્યૈરસંસ્પૃષ્ટં સેવિતં યોગિભિસ્સદા ।
સર્વદોષવિનિર્મુક્તં વિષ્ણું ધ્યાયન્ન સીદતિ ॥ ૫॥

ક્ષરાક્ષરવિનિર્મુક્તં જન્મમૃત્યુવિવર્જિતમ્ ।
અભયં સત્યસઙ્કલ્પં વિષ્ણું ધ્યાયન્ન સીદતિ ॥ ૬॥

અતુલ્યસખધર્માણં વ્યોમદેહં સનાતનમ્ ।
ધર્માધર્મવિનિર્મુક્તં વિષ્ણું ધ્યાયન્ન સીદતિ ॥ ૭॥

વ્યાસાદ્યૈર્મુનિભિસ્સિદ્ધૈઃ ધ્યાનયોગપરાયણૈઃ ।
અર્ચિતં ભાવકુસુમૈઃ વિષ્ણું ધ્યાયન્ન સીદતિ ॥ ૮॥

વિષ્ણ્વષ્ટકમિદં પુણ્યં યોગિનાં પ્રીતિવર્ધનમ્ ।
યઃ પઠેત્પરયા પ્રીત્યા સ ગચ્છેદ્વિષ્ણુસામ્યતામ્ ॥ ૯॥

એતત્ પુણ્યં પાપહરં ધન્યં દુઃસ્વપ્નનાશનમ્ ।
પઠતાં શ‍ૃણ્વતાં ચૈવ વિષ્ણોર્માહાત્મ્યમુત્તમમ્ ॥ ૧૦॥

ઇતિ શ્રીવિષ્ણ્વષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Vishnu Ashtakam*

pdf was typeset on September 18, 2022

Please send corrections to *sanskrit@cheerful.com*